# आदिगुरु अवधूत दत्तात्रेय वज्रकवचम्

**विनियोग :** अस्य श्रीदत्तात्रेयवज्रकवचस्तोत्रमन्त्रस्य किरातरुपी महारुद्र ऋषिः, अनुष्टुप् छन्दः, श्री दत्तात्रेयो देवता, द्रां बीजम्, आं शक्तिः, क्रौं कीलकम्, ॐ आत्मने नमः। ॐ द्रीं मनसे नमः। ॐ आं द्रीं श्रीं सौं ॐ क्लां क्लीं क्लूं क्लैं क्लौं क्लः। श्री दत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः।।

**करन्यास :** ॐ द्रां अंगुष्ठाभ्यां नमः। ॐ द्रीं तर्जनीभ्यां नमः। ॐ द्रूं मध्यमाभ्यां नमः।
ॐ द्रैं अनामिकाभ्यां नमः। ॐ द्रौं कनिष्ठिकाभ्यां नमः। ॐ द्रः करकरतलकरपृष्ठाभ्याम नमः।

**रक्षण : 'ॐ भूर्भुवः स्वरोम्'** से चुटकी बजाते हुए रक्षा के लिये दिग्बन्ध करना चाहिये।

**ध्यान :** जगदंकुरकन्दाय सच्चिदानन्दमूर्तये। दत्तात्रेयाय योगीन्द्रचन्द्राय परमात्मने।।
कदा योगी कदा भोगी कदा नग्नः पिशाचवत्। दत्तात्रेयो हरिः साक्षाद्भुक्तिमुक्तिप्रदायकः।।
वाराणसीपुरस्नायी कोल्हापुरजपादरः। माहुरीपुरभिक्षाशी सह्यशायी दिगम्बरः।।
इन्द्रनीलसमाकारश्चन्द्रकान्तसमद्युतिः। वैदूर्यसदृशस्फूर्तिश्चलत्किंचिज्जटाधरः।।
स्निग्धधावल्ययुक्ताक्षोऽत्यन्तनीलकनीनिकः। भ्रूवक्षःश्मश्रुनीलांकः शशांकसदृशाननः।।
हासनिर्जितनीहारः कण्ठनिर्जितकम्बुकः। मांसलांसो दीर्घबाहुः पाणिनिर्जितपल्लवः।।
विशालपीनवक्षाश्च ताम्रपाणिर्दलोदरः। पृथुलश्रोणिललितो विशालजघनस्थलः।।
रम्भास्तम्भोपमानोरूर्जानुपूर्वैकजंघकः। गूढगुल्फः कूर्मपृष्ठो लसत्पादोपरिस्थलः।।
रक्तारविन्दसदृशरमणीयपदाधरः। चर्माम्बरधरो योगी स्मर्तृगामी क्षणे क्षणे।।
ज्ञानोपदेशनिरतो विपद्धरणदीक्षितः। सिद्धासनसमासीन ऋजुकायो हसन्मुखः।।
वामहस्तेन वरदो दक्षिणेनाभयंकरः। बलोन्मत्तपिशाचीभिः क्वचिद्युक्तः परीक्षितः।।
त्यागी भोगी महायोगी नित्यानन्दो निरंजनः। सर्वरूपी सर्वदाता सर्वगः सर्वकामदः।।
भस्मोद्धूलितसर्वांगो महापातकनाशनः। भुक्तिप्रदो मुक्तिदाता जीवन्मुक्तो न संशयः।।
एवं ध्यात्वऽनन्यचित्तो मद्वज्रकवचं पठेत्। मामेव पश्यन्सर्वत्र स मया सह संचरेत्।।
दिगंबरं भस्मसुगन्धलेपनं चक्रं त्रिशूलं डमरुं गदायुधम्।
पद्मासनं योगिमुनीन्द्रवन्दितं दत्तेति नामस्मरणेन नित्यम्।।

(अथ पंचोपचारैः सम्पूज्य, **'ॐ द्रां'** इतिअष्टोत्तरशतं जपेत्)

**कवच :** कूर्च मनोमयः पातु हं क्षं द्विदलपद्मभूः। ज्योतीरूपोऽक्षिणी पातु शब्दात्मकः श्रुती।।
नासिकां पातु गन्धात्मा मुखं पातु रसात्मकः। जिह्वां वेदात्मकः पातु दन्तोष्ठौ पातु धार्मिकः।।
कपोलावत्रिभूः पातु पात्वशेषं ममात्मवित्। स्वरात्मा षोडशाराब्जस्थितः स्वात्माऽवताद्गलम्।।
स्कन्धौ चन्द्रानुजः पातु भुजौ पातु कृतादिभूः। जत्रुणी शत्रुजित् पातु पातु वक्षःस्थलं हरिः।।
कादिठान्तद्वादशारपद्मगो मरुदात्मकः। योगीश्वरेश्वरः पातु हृदयं हृदयस्थितः।।
पार्श्वे हरिः पार्श्ववर्ती पातु पार्श्वस्थितः स्मृतः। हठयोगादियोगज्ञः कुक्षी पातु कृपानिधिः।।
डकारादिफकारान्तदशारसरसीरुहे। नाभिस्थले वर्तमानो नाभिं वह्निनयात्मकोऽवतु।।
वह्नितत्त्वमयो योगी रक्षतान्मणिपूरकम्। कटिं कटिथब्रह्माण्डवासुदेवात्मकोऽवतु।।
बकारादिलकारान्तषट्पत्राम्बुजबोधकः। जलतत्त्वमयो योगी स्वाधिष्ठानं ममावतु।।
सिद्धासनसमासीन ऊरू सिद्धेश्वरोऽवतु। वादिसान्तचतुष्पत्रसरोरुहनिबोधकः।।
मूलाधारं महीरूपो रक्षताद्वीर्यनिग्रही। पृष्ठं च सर्वतः पातु जानुन्यस्तकराम्बुजः।।
जंघे पात्ववधूतेन्द्रः पात्वंघ्री तीर्थपावनः। सर्वांगं पातु सर्वात्मा रोमाण्यवतु केशवः।।
चर्म चर्माम्बरः पातु रक्तं भक्तिप्रियोऽवतु। मांसं मांसकरः पातु मज्जां मज्जात्मकोऽवतु।।
अस्थिनि स्थिरधीः पायान्मेधां वेधाः प्रपालयेत्। शुक्रं सुखकरः पातु चित्तं पातु दृढाकृतिः।।
मनोबुद्धिमहंकारं हृषिकेशात्मकोऽवतु। कर्मेन्द्रियाणि पात्वीशः पातु ज्ञानेन्द्रियाण्यजः।।
बन्धून् बन्धूत्तमः पायाच्छत्रुभ्यः पातु शत्रुजित्। गृहारामधनक्षेत्रपुत्रादींछंकरोऽवतु।।
भार्यां प्रकृतिवित् पातु पश्वादीन्पातु शार्गभृत्। प्राणान्पातु प्रधानज्ञो भक्ष्यादीन्पातु भास्करः।।
सुखं चन्द्रात्मकः पातु दुःखात् पातु पुरान्तकः। पशून्पशुपतिः पातु भूतिं भूतेश्वरो मम।।
प्राच्यां विषहरः पातु पात्वाग्नेय्यां मखात्मकः। याम्यां धर्मात्मकः पातु नैर्ऋत्यां सर्ववैरिहृत्।।
वाराहः पातु वारुण्यां वायव्यां प्राणदोऽवतु। कौबेर्यां धनदः पातु पात्वैशान्यां महागुरुः।।
ऊर्ध्वं पातु महासिद्धः पात्वधस्ताज्जटाधरः। रक्षाहीनं तु यत्स्थानं रक्षत्वादिमुनीश्वरः।।

(**मालामन्त्रजापः।**

**हृदयादिन्यासः** ॐ द्रां हृदयाय नमः। ॐ द्रीं शिरसे स्वाहा। ॐ द्रूं शिखायै वषट्।
ॐ द्रैं कवचाय हुम्। ॐ द्रौं नेत्रत्राय वौषट्। ॐ द्रः अस्त्राय फट्।

# दत्तात्रेय स्तोत्रम्

जटाधरं पाण्डुरंगं शूलहस्तं कृपानिधिम्। सर्वरोगहरं देवं दत्तात्रेयमहं भजे।।

**विनियोग**–अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य भगवान नारद ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तः परमात्मा देवता, श्रीदत्तप्रीत्यर्थ जपे विनियोगः।

जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे। भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते।।
जराजन्मविनाशाय देहशुद्धिकराय च। दिगम्बर दयामूर्ते दत्तात्रेय नमोऽस्तु ते।।
कर्पूरकान्तिदेहाय ब्रह्ममूर्तिधराय च। वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तु ते।।
ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित। पंचभूतैकदीप्ताय दत्तात्रेय नमोऽस्तु ते।।
यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च। यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तु ते।।
आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः। मूर्तित्रयस्वरूपाय दत्तात्रेय नमोऽस्तु ते।।
भोगालयाय भोगाय योग्ययोग्याय धारिणे। जितेन्द्रिय जितज्ञाय दत्तात्रेय नमोऽस्तु ते।।
दिगम्बराय दिव्याय दिव्यरूपधराय च। सदोदितपरब्रह्म दत्तात्रेय नमोऽस्तु ते।।
जम्बूद्वीपे महाक्षेत्रे मातापुरनिवासिने। जयमानः सतां देव दत्तात्रेय नमोऽस्तु ते।।
भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे। नानास्वादमयी भिक्षा दत्तात्रेय नमोऽस्तु ते।।
ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले। प्रज्ञानघनबोधाय दत्तात्रेय नमोऽस्तु ते।।
अवधूत सदानन्द परब्रह्मस्वरूपिणे। विदेहदेहरूपाय दत्तात्रेय नमोऽस्तु ते।।
सत्यरूप सदाचार सत्यधर्मपरायण। सत्याश्रय परोक्षाय दत्तात्रेय नमोऽस्तु ते।।
शूलहस्त गदापाणे वनमालासुकन्धर। यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय नमोऽस्तु ते।।
क्षराक्षरस्वरूपाय परात्परतराय च। दत्तमुक्तिपरस्तोत्र दत्तात्रेय नमोऽस्तु ते।।
दत्तविद्याय लक्ष्मीश दत्तस्वात्मस्वरूपिणे। गुणनिर्गुणरूपाय दत्तात्रेय नमोऽस्तु ते।।
शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम्। सर्वपापशमं याति दत्तात्रेय नमोऽस्तु ते।।
इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारकम्। दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम्।।

•••